# भारतमुद्रा।



(कलोत्सवविशिष्टसंपुटः - १८-०१-२०१२)

## प्रतिभातिलकादीनि पुनःस्थापयिष्यन्ति।

राज्यस्तरीयस्कूल्कलोत्सवे उच्चतमविजयबिन्दून् प्राप्तवते छात्राय कलाप्रतिभा, छात्र्यै कलातिलकञ्च उपाधिरूपेण समर्प्यत आसीत् त्रिचतुर्वर्षेभ्यः पूर्वं यावत्। परन्तु यदा सामान्यविद्याभ्यासस्तरे अङ्कानां स्थाने श्रेणीनिर्णयः अवतारितः तदारभ्य कलोत्सवेऽपि उच्चतमस्थानं परित्यक्तम्। स्थानस्यास्य निर्णयमानदण्डमधिकृत्यापि परिवादपरम्परा जायमानाः आसन्।

५२त्तमकलोत्सवेऽस्मिन् प्रतिभा-तिलक-बिरुदयोः पुनःसंस्थापनमावश्यकमिति बहुभ्यः कोणेभ्यः आवश्यमुन्नीतम्। प्रजानामावश्यं परिगण्य कार्येऽस्मिन् पुनर्विचिन्तनमवश्यं कृतं भविष्यतीति विद्याभ्यासमन्त्रिणा अब्दुरब्ब् महोदयेन उद्घुष्टम्। उद्घाटनसमारोहस्य आध्यक्ष्यं वहन्नसौ कलोत्सवविजयिभ्यः दीयमानं धनराशिपुरस्कारमपि कालानुसृतं वर्धयिष्यतीति प्रतिज्ञातवान्।

यथाकथञ्चित् प्रतिभातिलकादिबिरुदयोः पुनस्संस्थापनावसरे सम्यक् विचिन्तनमावश्यकमित्येव कलाकुतुकिनाम् ऐककण्ठाभिमतम्। सम्यक् चर्चां कृत्वैव तन्निर्णयोपाधयः अङ्गीकार्याः।

## प्रतिभातिलकमधिकृत्य.........

संस्कृतोत्सवस्य कृते अत्यन्तं प्रधानस्थलमस्ति तृश्शिवपेरूर्। सांस्कारिकमण्डले संस्कृतशिक्षणमण्डले च तृश्शूरजनपदं स्वस्य महिमां प्रकाशयति। तस्मात् कारणात् इतः आरभ्य संस्कृतोसत्सवस्पर्धायां यः अथवा या उन्नतस्थानं प्राप्स्यति तस्य अथवा तस्याः कृते संस्कृतप्रतिभापुरस्कारं दातुं संस्कृतोत्सव - संघाटकाः प्रयत्नं कुर्वन्तु इति प्रार्थना संस्कृतप्रेमिणाम्।

## नाटकवेदिकयोः।



संस्कृतमलयालनाटकवेदिकयोः जनबाहुल्येन पादं स्थापयितुम् अपि न शक्नुमः। तृश्शिवपुरस्य नाटकास्वादनपरम्परां समर्थयितुम् उभयत्रापि द्रष्टारः स्पर्धन्ति। नेत्रानन्दकरम् इदं दृश्यं समर्थयति यत् प्रेक्षकाणां युवकानां बालकानां च संख्या अधिकं दृश्यते। अन्नपेयादिकं विस्मृत्य नाट्यरसपानेन सन्तुष्टेभ्यः सद्भ्यः आहारोपि न रोचते

इतिवत् तत्रैव तिष्ठन्ति। अत्र भाषा अपि न विघाटिका इत्येतत् ज्ञापयति संस्कृतनाटकसभायामपि पादस्थापनाय नास्ति स्थानम् इतीदं सत्यम्।

## कुत एवम् ?

जिल्लास्तरीयस्पर्धासु विविधकारणैः अर्हं स्थानम् अलब्धवन्तः स्पर्धालवः नियमानुसारं स्वकीयान् व्यवहारान् तत्तत्स्थानेषु निवेद्य राज्यस्तरीयस्पर्धायां भागं ग्रहीतुम् अनुमतिं लब्धवन्तः सन्ति। परन्तु एतेषां नामानि सङ्घचयने (cluster) न अन्तर्भावितम्। अनेन तु, परिवादवतां प्रकटनानि विवेचयितुं लब्धावसराः सन्ति विधिकर्तारः तदायोजकाश्च।

## संस्कृतविज्ञानप्रदर्शिनी श्लाघनीया।

राज्यस्तरीयकलोत्सवस्य मुख्यवेदिकासमीपे प्रदर्शनशालायां विद्यमानसंस्कृतविज्ञानप्रदर्शिनी भारतस्य शास्त्रपरम्परायाः तथा संस्कृतस्य च महत्वभविष्ये उद्घोषयति। प्रदर्शिन्या सह संस्कृतपुस्तकानां ध्वनिमुद्रिकाणां सान्द्रमुद्रिकाणां च समाहारः तत्र लभ्यः। विश्वसंस्कृतप्रतिष्ठानेन आयोजितेयं प्रदर्शिनी विषयाणां वैविध्येन, ' **संस्कृतं न केवलं पुरातनी भविष्यमाणजगतः अपि भाषा** ' अस्तीति स्थापयति।

## वन्दे मातरम्।

द्विपञ्चाशत्तम-स्कूल्-कलोत्सवस्य अङ्गतया समायोजिते संस्कृतोत्सवे अद्य विवेकोदयं बालकोच्चविद्यालये प्रथमतया वन्देमारस्पर्धा जाता। विविधवर्णयुक्तैः गणवेषैः अलङ्कृतैः बालिकाबालकैः हृदयस्पर्शितया आलपितं वन्देमातरगानं कस्य वा नेत्रानन्दकरं श्रवणानन्दकरं च नाभवत् ? तस्यामेव वेदिकायां ततः परं सङ्घगानस्पर्धा समारब्धा।

## कुत्र गता इमे महर्षभाः?

तृश्शूर् नगरे आगतानां सर्वेषां श्रद्धामाकर्षन्तः बहवः महर्षभाः अत्रत्यं दैनन्दिनदृश्यमासीत्। परन्तु युवजनोत्सवसंबन्धजनबाहुल्ये तेषां छायापि न दृश्यते। कुत्र वा गता इमे ? वटक्कुंनाथमहोदयेन स्वगणेभ्यः अपि विशिष्टं निर्देशं कमपि दत्तो वा ? न जाने! परन्तु जानन्तु, तेऽस्माकं मित्राण्येव; कस्मैचिदपि विना हेतुं न कदापि द्रुह्यन्ति।

## माध्यमानां सहकारिता।

५२त्तमकलोत्सवे माध्यमलोकस्य सहकारिता अत्यन्तं प्रशंसामर्हति। साधारणया रन्ध्रेष्वेव दृष्टिं पातयन्तः तत्प्रवर्तकाः श्लाघनीयानप्यंशान् पश्यन्तीति दिनद्वयेन स्थापितवन्तः। सङ्घाटकसमित्यै सर्वं साह्यम् आचरन्तः इमे सामान्यजनानामपि

सहायकत्वेन नक्तं दिवं सर्वत्र प्रवर्तन्ते। तेभ्यो धन्यवादाः।

## पत्तिसेना अतिश्लाघ्या।

युवजनोत्सवस्य संघाटकरूपेण तत्पत्तिसेनाधिकारिभिः तत्र तत्र विन्यस्तानां पत्तिसेवाघटकानां सेवनमप्रशंसन् नास्ति कोपि वर्तते, अत्र आगतेषु गतेषु वा। ' पत्तिसेना ' इतीदं पदमन्यस्मिन्नर्थे रूढिं प्राप्तमस्ति केरलेषु येषु केवलं सर्पशूरस्य (मूर्खसर्पस्य) पत्तिमेव ज्ञातवत्सु। परन्तु अत्र पुलिस् इत्याङ्गलपदार्थे न रूढिं प्राप्तस्य उचिततरं पदमन्यदस्ति चेत् योजयन्तु सहृदयाः मर्मवेदिनः।

## सावधानैर्भाव्यम्।

संस्कृतोत्सवस्य वेदिकानां विषये चिन्तयामः चेत्, किम्? संस्कृतम् एतावदेव अर्हति? कुतः एता वेदिकाः शुष्काः जाताः ? कस्यापि व्यक्तेः संविधानस्य कारणेन वा ? पुनः कथं एवं वेदिकासु श्रोतारः द्रष्टारः वा विरलाः? पाठकादीनां वेदिकायामपि केवलं तत्संबन्धिनः श्रोतारः अथवा छात्राणां गुरुबान्धवाः एव आसन्। एतस्य कारणं किम् ? वेदिकेयं मुख्यवेदिकातः बहुदूरे इत्येतत् अत्र लघुकारणं स्यात्। कारणं किमपि वा भवतु। तस्य पश्चात् गत्वा इतः परं प्रयोजनं नास्ति। परन्तु भविष्ये दत्तावधानैर्भाव्यम्।

# प्रश्नो वा उत्तरं वा ?

अतिविशिष्टायाः प्रश्नोत्तरीस्पर्धायाः साक्षित्वमनुभूय इतिकर्तव्यमूढाः समभवन् स्पर्धालूनां छात्राणां परिवाराः।

एकस्मिन् प्रकोष्ठे भागभाजिनः विधिकर्तारः च प्रविश्य वातायनानि पिहितानि। तदन्तः किं सम्भवति ? कीदृशाः प्रश्नाः पृष्टाः? उत्सवनियमावलिमनुसृत्य वा स्पर्धा प्रचालिता ? इत्यादीनि ज्ञातुम् इतरेषाम् अवसरं पिधाय "पिहितप्रकोष्ठस्पर्धा" इति नामान्तरेण व्यवहार्या काचन स्पर्धा अभवत् २८तमराज्यस्तरीयसंस्कृतोत्सवस्य "प्रश्नोत्तरीस्पर्धा" ।

कोस्त्यत्रापराधी ? कं प्रति प्रक्ष्यामः ? उत्तरमजानन्तः वेदिकासु सर्वत्र परिभ्रमन्ति।

विशिष्टनिवेदकः।

# पिहितवेगाः संस्कृतनाटकप्रेमिणः।

५२त्तम-राज्यस्तरीय-स्कूल्-कलोत्सवे संस्कृतनाटकस्पर्धायाः वेदिका चेम्पूक्काव् होलिफामिलि कोण्वेन्ट् सभाङ्कणमासीत्। सभाङ्कणमतिसमीचीनम् ! तत्रापि जनबाहुल्यसम्मर्द्दमन्वभवन् दृश्यकलाप्रेमिणः। प्रातः नववादने आरब्धा स्पर्धा रात्रौ दशवादनपर्यन्तं दीर्घिताभवत्। पेयजललघुभक्षणादीनां व्यवस्था अत्यन्तं श्लाघनीयासीत्। परन्तु द्वितीयं वेगं निर्वोढुं आवश्यकशौचालय-

व्यवस्थाकार्ये अत्यन्तं क्लेशमन्वभवन् कलाप्रेमिणः। यद्यपि प्रथमवेगपरिहाराय सुव्यवस्था (Urinal) आसीत् तथापि द्वितीयवेगपरिहारार्थम् आयोजितं स्थानं (toilet) नैव अनुद्घाटितम्। मार्गान्तराभावात् प्रथमवेगपरिहारव्यवस्थयामेव वेगद्वयं परिहृत्य प्रत्यागताश्च सन्ति। अनेन तु, इतरेषां प्रथमवेगपरिहारोपि निषिद्धोऽभवत्।

## विपरीतविधिः दैवगत्या ? उत वा ...........?

प्रभाषणस्पर्धायां विधिनिर्णयमधिकृत्य परिवादः जागर्ति। प्रभाषणविषयः विधिकर्तृभिः दत्त आसीत्। परन्तु विषयमधिकृत्य द्वित्राणि वाक्यानि उच्चार्य तदनन्तरं हृदिस्थं प्रभाषणं कृतवद्भ्यः एव प्रथमद्वितीयादिस्थानानि कल्पितानि। ये छात्राः स्वकीयं भाषाज्ञानं उपयुज्य उक्तं विषयमधिकृत्य प्रभाषितवन्तः, ते द्वितीय-तृतीयश्रेणीपर्यन्तं निरस्ताः अभवन्। एतदधिकृत्य विद्याभ्यासाधिकारिणे आवेदनं समर्पयितुं कृतसन्नद्धाः सन्ति संस्कृताध्यापकाः।